वातिकस्य रूपमाह हृच्छङ्खपार्श्वोदरमूर्द्धशूली क्षामाननः क्षीणबलस्वरौजाः। प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव । शङ्खो ललाटैकदेशः, शुष्कं श्लेष्मादिरहितम् । पैत्तिकस्य रूपमाह तनोर्विदाहज्वरवक्त्रशोषैरभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः। पित्तेन पीतानि वमेत्कटूनि कासेत् सपाण्डुः परिदह्यमानः। सपाण्डुः, पाण्डुरोगयुक्तः । श्लैष्मिकस्य रूपमाह प्रलिप्यमानेन मुखेन सीदेत् शिरोरुजार्त्तः कफपूर्णदेहः। अभक्तरुङ्गौरवकण्डुयुक्तः कासेद्भृशं सान्द्रकफः कफेन । प्रलिप्यमानेन मुखेन श्लेष्मलिप्तेन मुखेनोपलक्षितः। अभक्तरुक् न भक्ते रुक् रुचिर्यस्य सः कण्डूः कण्ठ एव । क्षतकासस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह अतिव्यवायभाराध्वयुद्धाश्वगजनिग्रहैः । रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत् । अश्वगजयोर्निग्रहो दमनम् । लक्षणमाह स पूर्ब्बं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् । कण्ठेन कूजत्यत्यर्थं विभग्नेनेव चोरसा । सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना । दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना । पर्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीड़ितः । पारावत इवाकूजन् कासवेगात् क्षतोद्भवात् । कण्ठेनेत्युपलक्षणे तृतीया एवमुरसेति । क्षयकासस्य निदानपूर्ब्बिकां सम्प्राप्तिमाह विषमाऽसात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात् । घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः । कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम् । घृणिनां विचिकित्सायुक्तानाम् । लक्षणमाह सगात्रशूलज्वरमोहदाहप्राणक्षयश्चोपलभेत् स कासी । शुष्कं विनिष्ठीवति निर्बलस्तु प्रक्षीणमांसो रुधिरं सपूयम् । तं सर्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति । असाध्यसाध्ययाप्यानाह इत्येष क्षयजः कासः क्षीणानां देहनाशनः । साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः । एवं क्षतोत्थितः क्षीणानामसाध्यः । बलवतां साध्यो याप्यो वा स्यात् । न वा कदाचित् सिध्येतामपि पादगुणान्वितौ सिध्येतां क्षतजक्षयजौ सद्वैद्यः सद्भेषजः सत्परिचारकयुक्तस्य सदातुरस्य जातौ । स्थविराणां जराकासः सर्वो याप्यः प्रकीर्त्तितः । स्थविराणां जराकासः वृद्धानां यः कासो भवति स जराकाससंज्ञः स सर्व एव वातजादिरपि याप्यः । त्रीन् पूर्वान् साधयेत् साध्यान् पथ्यैर्याप्यांस्तु यापयेत् । स्वल्पोऽपि कास उपेक्षणीयो न भवति । किन्तु शीघ्रं प्रतिकरणीय इत्याह ज्वरारोचकहृल्लासस्वरभेदक्षयादयः । भवन्त्युपेक्षया यस्मात्तस्मात् त्वरया जयेत्" ।

कासरोगभेदस्य हेतुपापादि कर्म्मविपाकशब्दे १७६४, पृ०उक्तम् कं जलमस्यतेऽनेन अस–क्षेपणे करणे घञ् ६त० । २शोभाञ्जनवृक्षे पु० शब्दच० । तदञ्जनसेवने नेत्राज्जलनिस्सारणात्तस्य तथात्वम् ।

**कासकन्द** पु० कासहेतुः कन्दः । कासालौ राजनि०

**कासघ्न** त्रि० कासं हन्ति हन–हेत्वादौ टक । कासहरे सुश्रुतोक्ते १विधानभेदे । "प्रायोगिकः स्नेहनो वैरेचनः कासघ्नः वामनीयश्च" इत्युपक्रमे "बृहतीकण्टकारिकात्रिकटुककासमर्द्दनेङ्गुदीत्वङ्मनःशिलाच्छिन्नरुहाकर्कटशृङ्गीप्रभृतिभिः कासहरैश्च कासघ्ने" (धूमे) । स्त्रियां ङीप् । सा च २कण्टकार्य्यां स्त्री शब्दच० । "हरीतकी कणा शुण्ठी मरिचं क्षौद्रसंयुतम् । कासघ्नोमोदकः प्रोक्तस्तृष्णारोचकनाशनः" भावप्र०उक्ते ३मोदकभेदे पु० । काशनाशककाशहरादयोऽपि । काशरोगनिवारके त्रि० "येन तेन प्रकारेण वासकः कासनाशकः" वैद्यकम् कासहरैश्चेति सुश्रुतः

**कासजित्** स्त्री कासं जयति जि–क्विप् । १भार्ग्याम् (वामनहाटी) राजनि० । २काशनाशके त्रि० ।

**कासनाशिनी** स्त्री कासं नाशयति नश–णिच्–णिनि ङीप् । कर्कटशृङ्गीवृक्षे रत्नमा० ।

**कासन्दीवटिका** स्त्री वेशवारभेदे राजवल्लभः ।

**कासमर्द्द** पु० कासं मृद्नाति मृद–अण् उप०स० । काल-कासेन्दा) वृक्षे तद्गुणाद्युक्तं भावप्र० यथा "कासमर्द्दोऽरिमर्द्दश्च कासारिः कर्कशस्तथा । कासमर्द्ददलं रुच्यं वृष्यं कासविषास्रनुत् । मधुरं कफवातघ्नं पाटनं कण्ठशोधनम् । विशेषतः कासहरं पित्तघ्नं ग्राहकं लघु" । सुश्रुतेऽयं सुरसादिगणे पठितः सुरसादिशब्दे विवृतिः । कस्य जलस्यासेन क्षेपेण मृद्यतेऽसौ मृद–कर्म्मणि घञ् । वेशवारभेदे स च पिष्टजलमिश्रितवस्त्रगालितवेसवारः इति पाकराजेश्वरः ।

**कासमर्द्दन** पुंकासं मृद्नाति मृद–ल्यु ६त० । पटोले हारा०

**कासर** पुंस्त्री० के जले आसरति आ+सृ–अच् ७त० । महिषे अमरः तस्य कले सर्वदासरणात्तथात्वं स्त्रियां ङीष् ।

**कासहन्** पुंकासं हन्ति हन–क्विप् । "कण्टकारीकृतः क्वाथः सकृष्णः सर्वकासहा" इत्युक्ते कासनाशके १क्वाथभेदे